षष्ठः पाठः

# जय भारतमेदिनी

आधुनिके काले संस्कृतकविपरम्परायां श्रीरमाकान्तशुक्ल: अतीव प्रसिद्ध: अस्ति। अस्य 'जय भारतभूमे' इति काव्ये भारतमवलम्ब्य गीतानि विद्यन्ते। 'जय भारतमेदिनि विश्वनुते' इति शीर्षकात् अत्र कानिचित् पद्यानि प्रस्तूयन्ते। राष्ट्रभक्तिभावनाया: संवर्द्धनीयराष्ट्रस्य महत्त्वज्ञानाय च एतानि अतीव उपयुक्तानि।

*हिमवत्कलहासमरीचिसिते*
*यमुनाजलनीलविभामहिते !*
*रविचुम्बितकोकनदारुणिते*
*जय भारतमेदिनि विश्वनुते !1!*

*नवसर्षप-पीतदुकूलयुते*
*बहुशस्यसमूहविभाहरिते !*
*मलयानिलमोदकलाकलिते*
*जय भारतमेदिनि विश्वनुते !2!*

*अतिपुण्यपुरातनपद्धतिभि -*
*र्नवनूतनयोगप्रयोगचयै: !*
*समयोचितनीतिबलै: सहिते*
*जयभारतमेदिनि विश्वनुते !3!*

*मुनिभिर्मनुजैर्दनुजैर्विबुधै:*
*कविभिर्नवचित्रकलैश्च तथा !*
*निजजन्मसु जन्मसु कामयिते !*
*जय भारतमेदिनि विश्वनुते !4!*

*अभिमानधनै: रणशौण्डभटै:*
*कृषिकर्मपरै: श्रमिकैर्लसिते !*
*शुचिशान्तिसुधाभरिते वरदे*
*जय भारतमेदिनि विश्वनुते !5!*

*जय नैकप्रदेशप्रभालसिते !*
*बहुवर्णजनौघविभालसिते !*
*बहुलोकसुरीतिरसैः सरसे*
*जय भारतमेदिनि विश्वनुते !6!*

*करुणाकलिते ! मुदिताभरिते !*
*सरसे ! सरले ! मृदुले ! ललिते !*
*सुदृढे ! दुरितौघविनाशकरे !*
*जय भारतमेदिनि विश्वनुते !7!*

## शब्दार्थः

कलहासः - मृदुहासः (मधुर मुस्कान)। मरीचिसिते - धवलवर्णे (श्वेत वर्ण वाली)। मेदिनि - पृथ्वी। सर्षपः - धान्यविशेषः (सरसों)। दुकूलम् - वस्त्रम् (वस्त्र)। शस्यम् - धान्यम् (अनाज/चारा)। कलाकलिते - कलाभिः पूर्णिते (कलाओं से परिपूर्ण)। प्रयोगचयैः - प्रयोगसमूहैः (प्रयोगसमूहों के द्वारा)। विबुधैः - देवैः। कामयिते - वाञ्छिते। भटैः- वीरैः। लसिते - शोभिते। शुचिः - पवित्रता। नैके - अनेके। जनौघः - जनसमूहः।

## अभ्यासः

1. **एकपदेन उत्तरत -**
   (क) यमुनाजलं कीदृशं विभाति ?
   (ख) विश्वनुता का अस्ति ?
   (ग) भारतमेदिनी कैः पीतदुकूलयुता ?
   (घ) कीदृशैः योगप्रयोगचयैः भारतमेदिनी जया ?
   (ङ) भारते भटाः कीदृशाः ?
   (च) कृषिकर्मपराः के ?

2. **त्रिचतुर्भिर्वाक्यैः उत्तरत -**
   (क) भारतभूमिः कैः हरिता ?
   (ख) कविः निजजन्मसु-जन्मसु कैः सह भारतजयं कामयते ?
   (ग) भारतमेदिनी कदा वरदा ?
   (घ) भारतमेदिनी कैः सरसा भवति ?

3. **रिक्तस्थानानि पूरयत -**
   (क) मलयानिलमोद ............................।
   (ख) ................................ पद्धतिभिः।
   (ग) मुनिभिः ........................ विबुधैः।
   (घ) अभिमानधनैः .................................।
   (ङ) जय नैकप्रदेश ............................... लसिते।

4. **युग्ममेलनं कुरुत –**

| | **'अ'** | **'आ'** |
|---|---|---|
| (क) | रविचुम्बिता | पीता |
| (ख) | नवसर्षपैः | अरुणिता |
| (ग) | बहुशस्यसमूहैः | नीला |
| (घ) | यमुनाजलैः | सिता |
| (ङ) | हिमवत्कलहासमरीचिभिः | हरिता |

5. **अधोलिखितपदानां विभक्तिं वचनं च लिखत –**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| (क) मुनिभिः | | |
| (ख) जन्मसु | | |
| (ग) श्रमिकैः | | |

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) समयोचितम्

(ख) चित्रकलैश्च

(ग) जनौघः

(घ) नैकः

7. **नामेल्लेखपूर्वकं समासविग्रहं कुरुत –**

(क) नवसर्षपः

(ख) पीतदुकूलम्

(ग) मलयानिलः

(घ) कृषिकर्मपराः

8. **सप्तमे पद्यखण्डे भारतमेदिन्याः सम्बोधनानि लिखत।**

9. **'मेदिनी' शब्दस्य समानार्थकशब्दान् लिखत।**

**योग्यताविस्तारः –**

- अस्य गीतस्य सस्वरं समूहगायनं कुरुत।